National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(64): 82-84
© 2026 NJHSR
www.sanskritarticle.com

कौशिकहालदारः
शोधच्छात्रः, साहित्यविभागः,
राष्ट्रीयसंस्कृतविश्वविद्यालयः,
तिरुपतिः - 517507

Correspondence:
कौशिकहालदारः
शोधच्छात्रः, साहित्यविभागः,
राष्ट्रीयसंस्कृतविश्वविद्यालयः,
तिरुपतिः - 517507

संस्कृतबङ्गभाषयोः नैसर्गिकं सान्निहित्यम्

कौशिकहालदारः

शोधसारः-

भाषा केवलं संप्रेषणस्य साधनं न, अपि तु राष्ट्रस्य सांस्कृतिकपरम्परायाः संवाहिका इत्यपि मन्यन्ते बुधाः। भारतीयभाषापरम्परायां संस्कृतं सर्वाधिष्ठानरूपेण स्वीकृतम् अस्ति, या समस्तभारतीयभाषाणां मातृस्थानिया इति गण्यते। तत्र बङ्गभाषापि एका प्रमुखा अपत्यभाषा, या संस्कृतस्य विविधतत्त्वानि स्वभावतः आधिक्येन आत्मसात्कृतवती अन्यासां भारोपीयभाषाणां तुलनया। शोधपत्रेऽस्मिन् तयोः भाषयोः नैसर्गिकसान्निहित्यं सप्रमाणं संप्रकाशयितुं चेष्टे।

भूमिका-

संस्कृतं नाम दैवी वाक् अन्वाख्याता महर्षिभिः।
वेदादि सर्वशास्त्राणि यस्मादेव प्रवर्त्तते॥[1]

भारतीयभाषासु संस्कृतभाषा सर्वप्राचीनतमा समृद्धतमा च भाषा या देवतानां वाग्रुपेण कथितं महर्षिभिः। ऋग्वेदादिप्राचीनतमसाहित्यानां ब्राह्मणारण्यकादिगूढपरमतत्त्वानाम् अर्थशास्त्रज्योतिषा-दिशास्त्राणाम् आधारभूता इयं भाषा। अस्याः प्रभावः समस्तभारतीयभाषासु दृश्यते नितराम्। बङ्गभाषा अपि संस्कृतभाषाप्रभावेण सर्वजनसुविदिता सुललिता काव्यनाटकादिरत्नसुसमृद्धा गाम्भीर्यपूर्णा च रूपं प्राप्तवती। एतयोः भाषयोः नैसर्गिकं सान्निहित्यं स्पष्टतया ज्ञायते अस्माभिः। संस्कृतबङ्गभाषे उभे अपि भारोपीयकुटुम्बस्य आर्यशाखायाः अन्तर्गता। संस्कृतम् 'पुरातनभारोपीय'-भाषायाः सजीवप्रतिनिधिः, यया हिन्दिमाराठिबङ्गादि उपभाषाः समानीकरणेन वर्धिताः सन्ति।

बङ्गभाषायाः उत्पत्तिः

बङ्गभाषा प्राकृतादिभाषाभ्यः उत्पन्ना, यासां मूलं संस्कृतं भवति। पालि-अपभ्रंश-प्राकृत- इत्यादीनां माध्यमेन बङ्गभाषा विकसितवती। एतस्मात् स्पष्टं भवति यत् संस्कृतं बङ्गभाषायाः मूलाधाररूपेण स्थितम्।

शब्दसाम्यम्-

बङ्गभाषायाः अधिकाधिका शब्दाः प्रत्यक्षरूपेण परोक्षरूपेण च संस्कृतात् आगताः।

उदाहरणानि-

<u>संस्कृते</u> – माता, पिता, जलम्, अग्निः, तपस्या, भगिनी,

<u>बङ्गभाषायाम्</u> – মা/माता, পিতা(pitā)/पिता, জল(jal)/जल, অগ্নি(agni)/अग्नि,बह्नि, तपस्या, भगिनी।

एवं रूपेण नैकाः शब्दाः संस्कृतात् आगताः।

व्याकरणीयप्रभावः-

बङ्गभाषायां कर्तृ–कर्म–क्रिया पद्धतिः, समासरचनाः च संस्कृतव्याकरणेन अनुप्राणिताः। तथैव विभक्त्यन्तरूपेषु अपि संस्कृतसादृश्यं दृश्यते। आदौ

वाक्यसंघटना-

तद्यथा-

संस्कृते- रामः पुस्तकं पठति।

बङ्गे- राम पुस्तक पडछे। / রাম পুস্তক পড়ছে।

समासः- बङ्गभाषायामपि संस्कृतवत् तत्पुरुषद्वन्द्वादयः समासाः रमन्ते। बङ्गभाषायां सर्वे समासाः संस्कृतेन सह समानाः। तद्यथा- राजपुरुष/ मातापिता इत्यादयः।

प्रत्ययाः-

संस्कृते- "त्व" → बङ्गे-"त्ता"

संस्कृते -"मित्रत्वम्" → बङ्गे -"मित्रता"

उपसर्गाः- संस्कृते → बङ्गे

"प्रवेशः" → "प्रवेश",

"निर्गमनम्" → "निर्गमन"

कारकाः- कारकानां विषयेऽपि तथैव च।

शब्दकोषः-

बङ्गियशब्दकोशे त्रिविधाः शब्दवर्गाः सन्ति।[2] तद्यथा-

तत्समः – यथावत् संस्कृतशब्दः।

उदाहरणम् – विद्या, धर्म, प्रेम, शक्ति, नारी, पुरुष, नदी, पक्षी इत्यादयः।

तद्भवः – संस्कृतशब्दस्य विकसितरूपम्।

उदाहरणम् – जल > জল/ जल, गृह > ঘর/घर, अग्नि > আগুন/ आगुन।

देशज / विदेशजः – भारतस्य क्षेत्रीयभाषाभ्यः, अरबी/फारसीभ्यः वा आगताः शब्दाः। बहुवर्षेभ्यः वैदेशिकानां भारतवर्षे आगमनं तेषां सांस्कृतिकम् आदानप्रदानं च विदेशजशब्दानां संमिश्रणे कारणम्। बाङ्गला लेखनप्रणाली अपि नागरीलिपेः सन्दर्भे विकसित-ब्राह्मीपरम्परायाः अंशं वहति।

साहित्यिकप्रभावः-

बङ्गदेशस्य प्रारम्भिककवयः श्रीजीवगोस्वामी, रघुनन्दनः, कविकर्णपुरः, जयदेवः इत्यादयः संस्कृतलेखकाः आसन्। चैतन्य-चरितामृतम् अपि संस्कृतशैल्या लिखितम् अस्ति। बङ्गदेशे संस्कृतवाङ्मयस्य गूढः प्रभावः प्राचीनकालात् अस्ति। चण्डीदासः, विद्यापतिः, कविकङ्कणः, इत्यादीनां रचनासु संस्कृतशब्दानां प्रभावः दरीदृश्यते। संस्कृतरामायणमहाभारतपुरानादिग्रन्थानां साक्षात् बङ्गभाषया प्राचीनकालात् अनुवादं जायमानं दृश्यते।

यद्यपि शुक्लयजुर्वेदे बङ्गादिशब्दानां प्रयोगं प्राप्यते तथापि बङ्गभाषायाः प्राचीनतमनिदर्शणरुपेण नेपालदेशस्य राजसभायां प्राप्तं "चर्यापदम्" एव ऐतिहासिकैः स्वीक्रियते। चर्यापदे आदिम-मानवानां गूढप्रकृतिप्रेमस्वभावसिद्धप्रणयपरमेश्वरेभक्तिश्च प्रकटिता, या साक्षात् संस्कृतप्राचीनग्रन्थात् आगता।

यथा-

उनविंशशतके बङ्गप्रदेशे साक्षात् संस्कृतैव ग्रन्थरचनाः जायमानाः आसन्। तत्परं प्रारम्भं जातं बङ्गभाषायाः स्वर्णयुगम्। स्वर्णयुगीयकविषु अन्यतमप्रधानबङ्किमचन्द्रचट्टोपाध्यायः स्वीय-रचनायां साक्षात्संस्कृतशब्दानां संस्कृततत्समतद्भवशब्दानामेव प्रयोगश्चकार। तद्यथा-

আত্মোপকারীকে বনবাসে বসির্জন করা তাহাদিগের প্রকৃতি, তাহারা চিরকাল আত্মোপকারীকে বনবাস দিবে– কিন্তু যত বার বনবাসিত করুক না কেন, পরের কাষ্ঠাহরণ করা যাহার স্বভাব, সে পুনর্বার পরের কাষ্ঠাহরণে যাইবে। তুমি অধম–তাই বলিয়া আমি উত্তম হইব না কেন।

"আমরা ব্রাহ্মণ, কিন্তু সন্ন্যাসী; আমাদের দেবতা জননী ভারতবর্ষ।"

"ধর্মই রাজনীতি, রাজনীতিই ধর্ম।"

"অন্ন না পেলে মানুষ ধর্ম মানে না।"[3]

इतोऽपि तस्य वन्देमातरम्[4] इति गीतं सम्पूर्णे भारतवर्षे सुप्रसिद्धम्। तस्य रचनाः वर्तन्ते- आनन्दमठ, विषवृक्ष, कपाल-कुण्डला।

नोवेलजयीविश्वकविरबीन्द्रणाथठाकुरः स्वीयरचनायां संस्कृतस्यैवा-नुकरणं चकार। तस्य महाकाव्ये, काव्ये,गीते, प्रबन्धे , कवितायाञ्च संस्कृतस्यैव धारा प्रवाहिता।

तद्यथा- बाल्मीकिप्रतिभायाम्-

সহে না সহে না কাঁদে পরাণ।
সাধের অরণ্য হল শ্মশান।
দস্যুদলে আসি শান্তি করে নাশ,
ত্রাসে সকল দিশি কম্পমান।
আকুল কানন, কাঁদে সমীরণ,
চকিত মৃগ, পাখি গাহে না গান।
শ্যামল তৃণদল, শোণিতে ভাসিল,
কাতর রোদন- রবে ফাটে পাষাণ।
দেবী দুর্গে, চাহো, ত্রাহি এ বনে,
রাখো অধীনী জনে, করো শান্তি দান।।[5]

तस्य गीतिषु अपि संस्कृतस्य प्रभावः यथा-

विश्ववीणारवे विश्वजन मोहिछे इति गीते रागः शङ्कराभरणं (दक्षिणी)

বিশ্ববীণারবে বিশ্বজন মোহিছে।
স্থলে জলে নভতলে বনে উপবনে
নদীনদে গিরিগুহা- পারাবারে

নত্যি জাগে সরস সঙ্গীতমধুরিমা,

নত্যি নৃত্যরসভঙ্গিমা। -

নব বসন্তে নব আনন্দ, উৎসব নব।

অতি মঞ্জুল, অতি মঞ্জুল, শুনি মঞ্জুল গুঞ্জন কুঞ্জে-

শুনি রে শুনি মর্মর পল্লবপুঞ্জে,

পকিকূজন পুষ্পবনে বজিনে,

মৃদু বায়ুহলিোলবলিোল বভিোল বশিাল সরোবর- মাঝে কলগীত সুললতি বাজে।

শ্যামল কান্তার- 'পরে অনলি সঞ্চারে ধীরে রে,

নদীতীরে শরবনে উঠে ধ্বনি সরসর মরমর।

কত দকিে কত বাণী, নব নব কত ভাষা, ঝরঝর রসধারা॥[6]

ध्वन्यात्मकसादृश्यता-

ध्वनिव्यवस्थायां संस्कृतबङ्गभाषयोः नैसर्गिकः सम्बन्धः दृश्यते। विशेषतः अनुनासिकध्वनौ, तथा व्यञ्जनानाम् उच्चारणक्रमे इत्यादिषु-

संस्कृतम्		बङ्गभाषा
व/ब/भ	→	व/ भ
वेदः	→	বদে/वेद
ष/श/स	→	শ (श)
शान्तिः	→	শান্তি/ शान्ति
संस्कृतम्	→	সংস্কৃত/संस्कृत

पारस्परिकप्रभावः-

यद्यपि बङ्गभाषा संस्कृतप्रभाविता, तथापि नव्यसंस्कृतकाव्येषु बङ्गलोकजीवनस्य, शब्दरूपस्य च प्रभावः दृश्यते। उदाहरणार्थम्- नव्यकाले रचितानि संस्कृतकाव्यानि ग्रामीणबङ्गसामाजिकचित्रैः समृद्धानि।

ऐतिहासिकविकासः-

बङ्गभाषायाः विकासे प्राकृतभाषाभ्यः संस्कृतभाषायाः समावेशः महान्। १०–१२ शताब्द्यां बङ्गप्रदेशे संस्कृतशिक्षायाः केन्द्रत्वेन अस्तित्वं दृष्टम्। अनेके कवयः, पण्डिताः संस्कृतबङ्गभाषयोः मेलनं कृतवन्तः।

निष्कर्षः-

एवं दृश्यते यत् संस्कृतबङ्गभाषयोः नैसर्गिकं सान्निहित्यं केवलं भाषिके स्तरे न सांस्कृतिके, साहित्ये, व्याकरणे शब्दरचनायां ध्वनौ च अपि अत्यन्तं प्रगाढम् अस्ति। बङ्गभाषा संस्कृतस्य कन्या इव दृश्यते। अनेन अध्ययनेन वयं भाषाविकासस्य एकत्वं, भारतीय-भाषासंवादस्य सौन्दर्यं, संस्कृतबङ्गभाषयोः नैसर्गिकं सान्निहित्यं च अनुभवितुं शक्नुमः।

ग्रन्थावलिः (References)

1. Chatterji, S. K. (1926). The Origin and Development of the Bengali Language.
2. Sen, Sukumar. (1954). History of Bengali Language and Literature.
3. Macdonell, A. A. Sanskrit Grammar for Students.
4. De, Sushil Kumar. Bengali Literature in the Sanskrit Age.
5. Benerjee, Dr. Satyaranjan 2005 संस्कृतभाषातत्त्व।
6. दाशः, नारायणः, 2013 संस्कृतसाहित्ये पश्चिमबङ्गस्यावदानम्।
7. चट्टोपाध्यायः, बङ्किमः, आनन्दमठः।
8. ठाकुरः, रवीन्द्रणाथः, गीतवितान।

सन्दर्भाः -

[1] काव्यादर्शः/दण्डीन्/1/33 श्लोकः.

[2] संस्कृतभाषातत्त्व, ड. सत्यरञ्जनवन्दोपाध्याय। पृ-100

[3] आनन्दमठ/ बङ्किमचन्द्रचट्टोपाध्यायः

[4] आनन्दमठ/ बङ्किमचन्द्रचट्टोपाध्यायः/1.10.23

[5] बाल्मीकिप्रतिभा/ रवीन्द्रणाथठाकुर।

[6] विश्ववीणारवे विश्वजन मोहिछे/रवीन्द्रणाथठाकुरः।